६१-८६

Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४८ रन

Title लक्षणावली

Author वीरवल्लभः

Extent २ पत्र Age सं॰ १९२८

Subject ~~व्याकरण~~ न्याय

E-4

लक्षणावली

॥५७॥

#6186

F-3

लक्षणावली श्लो० ८० प० २



ल॰ च॰ १

ॐ श्रीगणेशाय नमः। अथ लक्षणावली लिख्यते। ननु गणेशत्वं नाम किम्. विघ्नविनाशनानुकूलव्यापारविशिष्टत्वम्. १
वारकत्वसंख्यावच्छिन्नरदनविशिष्टत्वं गणेशत्वं २ करीन्द्रवदनत्वविशिष्टत्वे सत्यन्यसर्वमानवशरीरविशिष्टत्वं ग
णेशत्वम् ३ द्रुममस्तकविशिष्टत्वे सति गजेनु स्विधजातत्वं वा गणेशत्वं ४ गिरिजाशरीरजन्यमलरूपितजनकतानि
रूपकत्वविशिष्टत्वं गणेशत्वं ५ नंदकेश्वरादिप्रसिद्धगणनिष्ठाधिपतित्वविशिष्टत्वं वा गणेशत्वम् ६ ननु कौमुदी
त्वं नाम किं ७ माङ्गलिकश्लोकव्यवहितोत्तरप्रणवघटितप्रत्याहारप्रयोजकचतुर्दशसूत्रघटितत्वे सति प्रत्ययवि
भागपूर्वकसंहिताप्रयोजकपदसिद्धिप्रकाशकसूत्रवृत्तिकारादिघटितवाक्यसमुदायत्वं कौमुदीत्वम् ७ ननु सू
त्रत्वं नाम किं। अल्पाक्षरत्वे सति बह्वर्थबोधकत्वं सूत्रत्वं ८ इति चेन्न वक्तव्यम्। हरिशब्दो व्याप्तियाप्तेरल्पाक्ष
रविशिष्टत्वे बह्वर्थबोधकत्वे ९ हरिर्ब्रह्मा हरिर्विष्णुः हरिर्देव महेश्वरः अथवा अल्पाक्षरविशिष्टत्वपूर्वक-
वृत्तिपरिच्छेदकत्वं सूत्रत्वं १० इति चेन्न अइउणित्यादिवृत्तिव्याप्तेर्वृत्तिपरिच्छेदकत्वाभावात् ११

ध= अवृत्ताग्रहणध्याधिघटितत्वं वा सूत्रत्वम्।१२। इति चेन्न. दान्ता गौतमसूत्राणां सूत्रत्वं न स्यात् अग्रहण
ध्याधिवदितत्वाभावात् १३ अथवा संज्ञापरिभाषाविधिनियमातिदेशाधिकारषट्कान्यत
मत्वं वा सूत्रत्वं १४ न तत्र यथा घटत्वज्ञानाभावे ऽयं घटो नीलोऽयं घटः पीत इत्यादिज्ञानाभावात्
तथा सूत्रत्वज्ञानाभावे संज्ञापरिभाषादिसूत्रविभेदज्ञानाऽसम्भवात्. १५ अथवा. पाणि
नीनिर्मितत्वं वा सूत्रत्वं १६ इति चेन्न। वेदान्तसूत्राणां पाणिनीनिर्मितत्वाभावात् १७

शान १

अथवा पूर्वकालिककणीशकृतभाष्याभावात् चरीकृतवृत्तिविशिष्टत्वं वा सूत्रत्वं १८ तन्न. गो
तमसूत्रे कणीशकृतभाष्याभावात् १९ न च भाष्यविशिष्टवृत्तिविशिष्टत्वं वा सूत्रत्वमिति वाच्यम्. २०
तर्हि गीतायामपि सूत्रत्वं यतो शंकरकृतभाष्यविशिष्टत्वात् २१ तस्मात्सूत्रस्य किं लक्षणम्. अल्पा
क्षरविशिष्टबह्वर्थबोधकपूर्वकालिकभाष्यवृत्तिसंयुक्तत्वे सति तच्छास्त्रसूत्रभूतत्वं सूत्रत्वं २२
ननु वृत्तित्वं नाम किम्. विशदसूत्रार्थाधिकारिणीभूतत्वं २३ तन्न. विशदसूत्रार्थाधिकारिणमनो
रमायामपि सत्वात् २४ वा अन्यसूत्राकष्टवदविशिष्टत्वे सति सूत्रार्थनिरूपकत्वं वृत्तित्वम्. २५ त
न्न। उपदेशेऽजनुनासिक इदिति वृत्त्या वन्यपदाकर्षणाभावात् २६ सूत्रस्याधिकान्तरनिरूपि
त सूत्रार्थविवरणप्रयत्नी वृत्तिः २७ तन्न. पाघ्राध्मेति सूत्रवृत्त्या वल्पान्तरत्वात् २८ अ
थवा सूत्रतात्पर्यार्थनिरूपकत्वं वृत्तित्वं २९ तन्न. तात्पर्यार्थनिरूपस्य तत्त्वबोधिन्यामपि
सत्वात् ३० अथवा वृत्तिकारपिनिर्मितत्वं वृत्तित्वम् ३१ तन्न. एत्येधत्यूठ्स्विति सूत्रोपरि
वृत्तिकृता व्याख्यानमत्रे वृत्तिचेयेत्ते रेव विशेषणेन तत्वे धत्तेरेवाव्यभिचारात्तनानाव्यूढः अम्भ

ख्या= वादि वृत्तिकार इति व्याख्यानस्यापि वृत्तित्वाजायते वृत्तिकारनिर्मितत्वात् ३२ अथवा. असधातुप्र
योगघटितत्वं वा वृत्तिं ३३ तन्न. तस्मिन्निति सूत्रवृत्तौ वा सधातोः प्रयोगाभावात् ३४ किं तावद्वृत्तित्वम्।
सूत्रार्थाधिकरणं तु सर्वकृतात्पर्यार्थनिरूपकत्वविशिष्टत्वे सति वृत्तिकारनिर्मितत्वाभा

ल॰ व॰
२

2

नापिवच्छिन्नकारास्त्वतिपादिनेन्ये धत्पूढस्तुव्याख्याने त्ययाप्तिलत्ववच्छिन्नकारनीभ्रितत्वेपिसत्तात्पर्यार्थता
पकत्वमेवकोमुख्याधिकरणकसत्तार्थाविशिष्टत्वपूर्वकतात्पर्यार्थानायकत्वविशिष्टत्वेसतिकारनिर्मि
तत्वंवृत्तित्वम् ३६ संज्ञात्वंनामकिम् सा — त्तिकपदजन्यबोधनानुकूलव्यापारवत्तिसंज्ञा ३७
ननुप्रत्याहारत्वंनामकिम् वर्णसंहतयाधिकरणत्वविशिष्टत्वंप्रत्याहारत्वम् ३८ इतिचेन्न॰ ।
अकारादिहणन्तिव्याप्तेः तत्राव्येकस्मिन्नव्याप्तेरप्यकात्मकारस्यसंक्षेपात् ३९ तर्हि किंप्र
त्या [illegible] हारत्वं पूर्वोत्पवर्णस्यारणविशिष्टादिरेन्यात्तिसत्वप्रतिपादकतत्वंप्रत्याहार
त्वम् ४० संकेतत्वंचनामकिम् तत्रत्काल्लीयाचार्योपनिबन्धधर्मत्वेदज्ञानामेति ।
कथ्यनेसंकेतत्वम् ४१ शक्तित्वंनामकिम् अस्मात्पदादयमर्थोबोधव्य इतिसंकेत
शक्तिः ४२ संधित्वंनामकिम् सत्ताधिकरणेविधेयताविच्छिन्नईत्वेसतिहल
जाधिकरणेककद्वित्वबहुत्वसंख्यावच्छिन्नवर्णनांपरवर्णसंयोगानुकूलोव्या
पार: संधि: ४३ उपसर्गत्वंनामकिम् धातुसंयोगोत्तरकालिकस्वार्थबोधना
नुकूलव्यापारविशिष्टत्वमुपसर्गत्वम् ४४ यत्ताधात्वधिकरणकत्वसंयोगोत्तरका
लिक धात्वर्थबोधकोतावच्छेदकत्वमुपसर्गत्वं ४५ किंवच्छेदकत्वम् तत्पदार्थव
त्तित्वमवच्छेदकत्वम् ४६ किमवच्छिन्नत्वम् तत्पदार्थविशिष्टत्वसवच्छिन्नत्वम् ४७ ।

शि॰ व॰
२

ननुशब्दत्वंकिंनाम॰ । प्रकृतिप्रत्ययोरेकार्थभावेनार्थजनकतावच्छेदकीभूततत्वंशब्दत्वम्॰ । ४८ । इति
चेन्नसंसारशब्देषुप्रकृतिप्रत्ययभागेन्तर्नीयमानार्थस्याजागरूकत्वाल्लिस्यमानत्वात् ४९ कोशादि
गृहीतशक्त्याप्रकृतिप्रत्यययोरेकार्थीभावेनवालौकिकार्थजनकतावच्छेदकीभूतत्वम् ५० तत्रप
रूढ़=४ इविधः शब्दः यौगिकयोगरूढयौगिकलाद्यणैकश्रुति ५१ अवयवशक्त्यार्थबोधनानुकूलव्यापारविशिष्टत्वं
यौगिकत्वम् अकाहिः ५२ धातुप्रत्ययजन्यसमुद्भूतार्थसम्भवत्तिविशिष्टत्वेसतिशोकजनितापीवरत्वम्॰ ।
योगरूढकत्वम् यथायङ्कजादिः केवलकोशगृहीतशक्तियत्वेरूढत्वे रूढत्वंयथाकुड्यादिः ५४ अवय
वार्थबोधंजनितार्थीभयविशिष्टरूढयौगिकत्वम् यथामण्डियोऽस्त्रीननीभ्रयेत्यमरः ५५ शक्यशेव
न्धविशिष्टत्वेसत्यार्थाधीजनकतावच्छेदकीभूतत्वलाद्यणिकत्वम् यथागंगायाघोषः ५६ तत्रवैया
करणानांमतेशब्दविशेषेऽष्टौस्फोटाः ३ वाक्यस्फोटः २ पदस्फोटः १ इतित्रयोव्यक्तिस्फोटः ३ वर्ण
जातिवाचिके सतिपदेवर्णपदवाक्यभेदे तत्रजातिस्फोटः वैवर्णपदस्फोटः वाक्यपदस्फोटः त्रैत्व
होस्फोटः ५७ यथारामइत्यत्ररकारस्कारमकारोकाराः वर्णवाचकाः वर्णस्फोटः रामइतिपद
मेकवाचिकजातिपदस्फोटः ५८ राममायाहितिवाक्यमेववाचकमिवाक्यस्फोटः इतित्रयव्यक्तिस्फो
टवाचिकानांमतेवर्णपदवाक्यव्यक्तिरेववाचिकाजातिवाचिकानांमतेवरगत्ववाक्यत्वजातिरेववाचिका ३२
केषांचिन्मतेरामइत्यत्रवर्णनामपिपदस्यापिवाचिकत्वेतत्रवर्णपदस्फोटः ३२ अर्थवत्त्वंनामकिं॰ । । प्र
कृतिप्रत्ययोरेकार्थीभवेनलोकेऽर्थविषयकबोधजनकत्वमर्थवत्त्वम् ३४ किंनामप्रवृत्तिवदिकत्वम्॰ ।

ल.व.
३

3



प=५

व्युत्पत्त्याधिकरणकधातुप्रत्ययघवान्ततानवच्छिन्नार्थकत्तावच्छिन्नशक्त्याधिकरणकप्रवर्तमानं प्रति वाँदिक त्वं ६५ वहानं व्युत्पत्तिवक्ताधिकारकृतहितं समानाधिकरणकजन्यार्थावच्छिन्नेशक्त्याधिकप्रवर्तमानं प्रतिवादित्वम् ६६ किं प्रत्ययत्वं । कृति संयोगेन स्वार्थ बोधकत्वम् प्रत्ययत्वम् ६७ का प्रकृतिः प्रत्य यस्य वर्तनी प्रकृतिः ६८ किं नाम लिङ्गत्वं । लिङ्गानुशासनादि निर्दिष्टत्वं लिङ्गत्वम् लिनके शेव तीत्वी स्यात् लोमशः पुरुषस्य तर्हि प्राचीनलक्षणमेषिवैत्त् आयकुतः वेचेत्तखड्गादि पुल नके वशत्वाभावात् किंजल्कादिषु लोमसत्वाभावाच्च ७० ननु लकारत्वं नाम किं कर्तृकर्मा द्यर्थविधीयमानत्वं लकारत्वम ७१ इति लक्षणमवघत्तं न कुतः कारदति कप्रत्यया नामपि तदर्थसंज्ञायमानत्वम् ७२ कृदन्तप्रत्ययभिन्नत्वे सति वर्तमानाद्यर्थे लः कर्मणि सूत्रेण धाति तरसंज्ञायमानत्वं लकारत्वं ७३ ननु धातुत्वं नाम किम् । ७४ न च गणपठितत्वं धातुत्वम् ७५ तर्हि सर्वशब्दस्यापि धातुसंज्ञा स्यात् ७५ न च भ्वादिधातुपाठाधिकरणदशगणपठित त्वम् ७६ सर्वशब्दस्य गणपठितत्वाभावात् नैववाच्यपुत्रीयति इत्यादि नामधातुत्व नान्नेस्यात् क्रियावाचकत्वे पि गणपठितत्वात् ७८ न च पूर्वोक्तलक्षणे वरीकृते पि नामधातुष्वनिव्याप्तिः कुतः नामधातून्नागणे पठितत्वात् ७९ तत्र संनेदना ष्वेव धातुसंज्ञा विधानात् ॥ शुभम् । भूयात् ।

इति लक्षणावली समाप्ता । ॥ सं. १९२८ वै. शु. १८

लिखितं श्रीहरिकृष्णा लिग्रामे ... जंबूद्वीपे ॥

शि.व.
३